Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

श्रीवैष्णवसिद्धान्तः

सर्वे वेदाः प्रमाणं त्रितयमनुगुणं सात्त्विकं सारशास्त्रं
श्रीमन्नारायणाख्यं चिदचिदनुगतं सद्गुणं शेषि तत्त्वम् ।
भक्तिर्मुक्तेरुपायः प्रपदनमपि तत् सर्वसत्त्वाधिकार्यं
मुक्तिर्लोके परस्मिन् परभजनमिति श्रीमतां वैष्णवानाम् ॥

—एकम् अभयङ्करस्य

संप्रदायः

लक्ष्मीनाथाख्यसिन्धौ शठरिपुजलदः प्राप्य कारुण्यनीरं
नाथाद्रावभ्यषिञ्चत् तदनुरघुवराम्भोजचक्षुर्झराभ्याम् ।
गत्वा तां यामुनाख्यां सरितमथ यतीन्द्राख्यपद्माकरेन्द्रं
संप्राप्य प्राणिसस्ये प्रवहति नितरां देशिकेन्द्रक्रमौघैः ॥

आचार्यनिर्णयः

विष्णुश्शेषी तदीयश्शुभगुणनिलयो विग्रहश्श्रीशठारिः
श्रीमान् रामानुजार्यः पदकमलयुगं भाति रम्यं तदीयम् ।
तस्मिन् रामानुजार्ये गुरुरिति च पदं भाति नान्यत्र तस्मात्
शिष्टं श्रीमद्गुरूणां कुलमिदमखिलं तस्य नाथस्य शेषः ॥

—द्वयं गोविन्दयतेः

गुरुलक्षणम्

सिद्धं सत्संप्रदाये स्थिरधियमनघं श्रोत्रियं ब्रह्मनिष्ठं
सत्त्वस्थं सत्यवाचं समयनियतया साधुवृत्त्या समेतम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

डम्भासूयादिमुक्तं जितविषयगणं दीर्घबन्धुं दयालुं
स्वालित्ये शासितारं स्वपरहितपरं देशिकं भूष्णुरीप्सेत् ॥

गुरूपासनम्

अज्ञानध्वान्तरोधादघपरिहरणादात्मसाम्यावहत्वात्
जन्मप्रध्वंसिजन्मप्रदगरिमतया दिव्यदृष्टिप्रभावात् ।
निष्प्रत्यूहानृशंस्यान्नियतरसतया नित्यशेषित्वयोगात्
आचार्यस्सद्भिरप्रत्युपकरणधिया देववत् स्यादुपास्यः ॥

शिष्यलक्षणम्

सद्बुद्धिस्साधुसेवी समुचितचरितस्तत्त्वबोधाभिलाषी
शुश्रूषुस्त्यक्तमानः प्रणिपतनपरः प्रश्नकालप्रतीक्षः ।
शान्तो दान्तोऽनसूयुश्शरणमुपगतश्शास्त्रविश्वासशाली
शिष्यः प्राप्तः परीक्षां कृतविदभिमतं(तः) तत्त्वतश्शिक्षणीयः ॥

—त्रयं वेदान्तदेशिकस्य

प्रमाणविवेकः

अक्षानुमानशब्दास्तु विद्यास्साङ्गाश्च नैगमाः ।
पाञ्चरात्रं द्राविडाश्च प्रमाणं प्रणवानुगाः ॥

—एकं ममैव

प्रमेयविवेकः

षड् द्रव्याणि दशाद्रव्याण्येषु विश्वं व्यवस्थितम् ।
विष्णुस्तत्त्वं त्रयं भाज्यमल्पमेष्वप्युदासितम् ॥

—एकं राममिश्रगुरोः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

तत्त्वविभागः

द्रव्याद्रव्यप्रभेदान्मितमुभयविधं तद्विदस्तत्त्वमाहुः
द्रव्यं द्वेधा विभक्तं जडमजडमिति, प्राच्यमव्यक्तकालौ ।
अन्त्यं प्रत्यक् पराक् च, प्रथममुभयधा तत्र जीवेशभेदात् ,
नित्याभूतिर्मतिश्चेत्यपरमिह जडामादिमां केचिदाहुः ॥

द्रव्यलक्षणम्

तत्र द्रव्यं दशावत् , प्रकृतिरिह गुणैस्सत्त्वपूर्वैरुपेता,
कालोऽब्दाद्याकृतिस्स्यादणुरवगतिमान् जीव, ईशोऽन्य आत्मा ।
संप्रोक्ता नित्यभूतिस्त्रिगुणसमधिका सत्त्वयुक्ता तथैव,
ज्ञातुर्ज्ञेयावभासो मतिरिति, कथितं संग्रहाद्द्रव्यलक्ष्म ॥

—द्वयं वेदान्तदेशिकस्य

अद्रव्यविचारः

अद्रव्यं योगशून्यं दशविधमुदितं, पञ्च ते शब्दमुख्याः,
संयोगश्शक्तिरत्र प्रकृतिगतगुणास्सत्त्वमुख्यास्त्रयस्ते ।
सत्त्वं शुद्धं च मिश्रं द्विविधमथ विभागादिरुक्ताद्यभावः,
धर्माधर्मौ गुरुत्वप्रभृतिकमपि यत् तत्तु तत्तत्स्वरूपम् ॥

विशिष्टाद्वैतम्

स्वसमाधिकशून्यत्व-चिदचित्-सद्गुणैरिदम् ।
विष्णुतत्त्वं विशिष्टं यद् विशिष्टाद्वैतमेव तत् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

हितविवेकः

कर्म ज्ञानं च भक्तिश्च प्रपत्तिर्वरणं गुरोः ।
उपायाः पञ्चविहिता हिता दिव्यतमाः क्रमात् ॥

कर्म — — त्रयं ममैव

कर्मयोगस्तपस्तीर्थदानयज्ञादिसेवनम् ।

ज्ञानम् —

ज्ञानयोगो जितस्वान्तैः परिशुद्धात्मनि स्थितिः ।

भक्तिः —

भक्तियोगः परैकान्तप्रीत्या ध्यानादिषु स्थितिः ।

उपायत्रयविवेकः —

त्रयाणामपि योगानां त्रिभिरन्योन्यसङ्गमः ।

— द्वयं यामुनमुनेः

कर्मविवेकः—

नित्यं नैमित्तिकं कार्यं देवकैङ्कर्यगर्भितम् ।
काम्यं तु सर्वथा त्याज्यं भगवत्प्रीतिभाग्यजैः ॥

—एकं राममिश्रगुरोः

अष्टविधा भक्तिः —

मद्भक्तजनवात्सल्यं, पूजायां चानुमोदनम् ।
स्वयमभ्यर्चनं चैव, मदर्थे दम्भवर्जनम् ॥
मत्कथाश्रवणे भक्तिः, स्वरनेत्राङ्गविक्रिया ।
ममानुस्मरणं नित्यं, यच्च मां नोपजीवति ॥

भक्तमाहात्म्यम्—

भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्तते ।
स विप्रेन्द्रो मुनिः श्रीमान् स यतिस्स च पण्डितः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम् ।
तत्पादाम्बुतुलं तीर्थं तदुच्छिष्टं सुपावनम् ॥
तदुक्तिमात्रं मन्त्राग्र्यं तत्स्पृष्टमखिलं शुचि ।
प्रत्यक्षितात्मनाथानां नैषां चिन्त्यं कुलादिकम् ॥

—पञ्चकं भगवच्छास्त्रे

प्रपत्तिः—

अनन्यसाध्ये स्वामीष्टे महाविश्वासपूर्वकम् ।
तदेकोपायतायाच्ञा प्रपत्तिश्शरणागतिः ॥

—एकं भरतमुनेः

षड्विधा प्रपत्तिः —

आनुकूल्यस्य सङ्कल्पः, प्रातिकूल्यस्य वर्जनम् ।
रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा ॥
आत्मनिक्षेप-कार्पण्ये षड्विधा शरणागतिः ।
स्वतन्त्रा तु समस्तार्था काष्ठोद्यत्पारतन्त्र्यगा ॥

—सार्धं भगवच्छास्त्रे, अर्धं ममैव

भगवत्संबन्धः

पिता च रक्षकश्शेषी भर्ता ज्ञेयो रमापतिः ।
स्वाम्याधारो ममात्मा च भोक्ता चाद्यमनूदितः ॥

—एकं कस्यचित्

परमार्थजीवनम्

वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम् ।
भाष्यामृतप्रदानाद्यः सञ्जीवयति मामपि ॥

—एकं श्रुतप्रकाशिकाचार्यस्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

सत्सङ्गात् भवनिस्पृहो गुरुमुखात्+श्रीशं प्रपद्यात्मवान्
प्रारब्धं परिभुज्य कर्मशकलं प्रक्षीणकर्मान्तरः ।
न्यासादेव निरङ्कुशेश्वरदयानिर्लीनमायान्वयो
हार्दानुग्रहलब्धमध्यधमनिद्वाराद् बहिर्निर्गतः ॥

मुक्तिमार्गः

मुक्तोऽर्चिर्दिनपूर्वपक्षषडुदङ्मासाब्दवातांशुमत्
ग्लौविद्युद्वरुणेन्द्रधातृमहितस्सीमान्तसिन्ध्वाप्लुतः ।
श्रीवैकुण्ठमुपेत्य नित्यमजडं तस्मिन् परब्रह्मणः
सायुज्यं समवाप्य नन्दति समं तेनैव धन्यः पुमान् ॥

प्रातर्नित्यानुसन्धेयं परमार्थं मुमुक्षुभिः ।
श्लोकद्वयेन संक्षिप्तं सुव्यक्तं वरदोऽब्रवीत् ॥

—त्रयं वरदविष्णुगुरोः

पुरुषार्थविवेकः

धर्मार्थकामकैवल्यं त्यक्त्वा, वैकुण्ठमाप्य च ।
स्वपरार्थैककैङ्कर्यं पुरुषार्थतमं मतम् ॥

—एकं ममैव

परत्वादिपञ्चकम्

उद्यद्भानुसहस्रभास्वरपरव्योमास्पदं निर्मल-
ज्ञानानन्दघनस्वरूपममलज्ञानादिभिः षड्गुणैः ।
जुष्टं, सूरिजनाधिपं धृतरथाङ्गाब्जं सुभूषोज्ज्वलं
श्रीभूसेव्यमनन्तभोगिनिलयं श्रीवासुदेवं भजे ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

आमोदे भुवने, प्रमोद उत, सम्मोदे च, सङ्कर्षणं
प्रद्युम्नं च तथाऽनिरुद्धमिति तान् सृष्टि-स्थिती चाप्ययम् ।
कुर्वाणान् मतिमुख्य-षड्गुणवरैर्युक्तांस्त्रियुग्मात्मकैः
व्यूहाधिष्ठितवासुदेवमपि तं क्षीराब्धिनाथं भजे ॥

वेदान्वेषण-मन्दराद्रिभरण-क्ष्मोद्धारण-स्वाश्रित-
प्रह्लादावन-भूमिभिक्षण-जगद्विक्रान्तयो यत्क्रियाः ।
दुष्टक्षत्रनिबर्हणं दशमुखाद्युन्मूलनं कर्षणं
कालिन्द्या अतिपापकंसनिधनं यत्क्रीडितं तं नुमः ॥

यो देवादिचतुर्विधेषु जनिषु ब्रह्माण्डकोशान्तरे
संभक्तेषु चराचरेषु निवसन् आस्ते सदाऽन्तर्बहिः ।
विष्णुं तं निखिलेष्वणुष्वणुतरं भूयस्सु भूयस्तरं
स्वाङ्गुष्ठप्रमितं च योगिहृदयेष्वासीनमीशं भजे ॥

श्रीरङ्गस्थल-वेङ्कटाद्रि-करिगिर्यादौ शतेऽष्टोत्तरे
स्थाने ग्रामनिकेतनेषु च सदा सान्निध्यमासेदुषे ।
अर्चारूपिणमर्चकाभिमतितस्स्वीकुर्वते विग्रहं
पूजां चाखिलवाञ्छितान् वितरते श्रीशाय तस्मै नमः ॥

प्रातर्विष्णोः परत्वादिपञ्चकस्तुतिमुत्तमाम् ।
पठन् प्राप्नोति भगवद्भक्तिं वरदनिर्मिताम् ॥

—षट् वरदविष्णुगुरोः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

भक्तिदशा—श्लोकद्वयम्

ग्राहग्रस्ते गजेन्द्रे स्रवति सरभसं तार्क्ष्यमारुह्य धावन्
व्याघूर्णन्माल्यभूषावसनपरिकरो मेघगम्भीरघोषः ।
आबिभ्राणो रथाङ्गं शरमसिमभयं शङ्खचापौ सखेटौ
हस्तैः कौमोदकीमप्यवतु हरिरसावंहसां संहतेर्नः ॥

नक्राक्रान्ते करीन्द्रे मुकुलितनयने मूल ! मूलेति खिन्ने,
नाहं नाहं न चाहं न च भवति पुनस्तादृशो मादृशेषु ।
इत्येवं त्यक्तहस्ते सपदि सुरगणे, भावशून्ये समस्ते,
मूलं यत् प्रादुरासीत् स दिशतु भगवान् मङ्गलं सन्ततं नः ॥

—द्वयं कस्यचित्

श्लोकत्रयम्

प्रातस्स्मरामि भवभीतिमहार्तिशान्त्यै
नारायणं गरुडवाहनमञ्जनाभम् ।
ग्राहाभिभूतमदवारणमुक्तिहेतुं
चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥

प्रातर्नमामि मनसा वचसा च मूर्ध्ना
पादारविन्दयुगलं परमस्य पुंसः ।
नारायणस्य नरकार्णवतारणस्य
पारायणप्रवणविप्रपरायणस्य ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

प्रातर्भजामि भजतामभयङ्करं तं
प्राक्सर्वजन्मकृतपापभयापनुत्त्यै ।
यो ग्राहवक्त्रपतिताङ्घ्रिगजेन्द्रघोर-
शोक-प्रणाशनकरो धृतशङ्खचक्रः ॥

— त्रयं पुराणेष्वपि

श्लोकत्रयमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः ॥

—एकं कस्यचित्

प्रमाण-प्रमेय-प्रमातृ-सारः

इत्थं सेव्यं, सुभोग्यं, शुभसुभगतनुं, सर्वभोग्यप्रकृष्टं
श्रेयस्तद्धेतुभूतं, प्रपदनसुलभं, स्वाश्रितानिष्टजिष्णुम् ।
भक्तच्छन्दानुरक्तं, निरुपधिसुहृदं, सत्पदव्यां सहायं,
श्रीशं प्राह स्वसिद्धेस्त्वयमिह करणं स्वप्रबन्धे शठारिः ॥

—एकं वेदान्तदेशिकस्य

प्रमातृप्रतिष्ठा

कासार-भूत-महदाह्वय-भक्तिसार-
श्रीभट्टनाथ-मधुरान् कुलशेखरेन्द्रम् ।
भक्ताङ्घ्रिरेणु-मुनिवाह-कलिप्रमथान्
श्रीमत्पराङ्कुशमुनिं दशरूपमीडे ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

प्रमेयविशेषः

अद्वैतस्य विशिष्टत्वं विष्णोस्सर्वशरीरिता
सर्वशब्दाभिधेयत्वं सर्वकारणता तथा ॥

सर्वश्रुतिसमर्थत्वं द्वयमन्त्रार्थनिष्ठता ।
प्रपत्तेस्सर्वयोग्यत्वं कैङ्कर्यपुरुषार्थता ॥

मुक्तावानन्दतुल्यत्वं यथार्थख्यातिनिष्ठता ।
दशैते प्रतितन्त्रार्थाः विशिष्टाद्वैतिनां मताः ॥

आचारविशेषः

तापः पुण्ड्रस्तथा नाम मन्त्रो यागश्च पञ्चमः ।
एतेहि पञ्च संस्काराः वैष्णवानां विशेषतः ॥

गृहस्थाचार्यपीठत्वं मुख्यवैष्णवजन्मता ।
विष्णुगोष्ठीषु समता पादतीर्थादिसेवनम् ॥

तप्तचक्रोर्ध्वपुण्ड्राब्जतुलस्यादिविभूषणम् ।
एवमादय आचाराः तत्त्वानुष्ठानसिद्धिदाः ॥

—सप्त ममैव

रामानुजार्यदिव्याज्ञा

श्रीभाष्य-द्रविडागमप्रवचने, श्रीशस्थलेष्वन्वहं
कैङ्कर्यं, यदुशैलनित्यवसतिस्सार्थद्वयोच्चारणम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

यद्वा भागवताभिमानवसतिश्श्रेयस्सतामित्यलं
शिष्यान् प्राह यतीश्वरः परमगाद्विष्णोः पदं शाश्वतम् ॥

—एकं कस्यचित्

अनुष्ठानम्

संसारावर्तवेगप्रशमनशुभदृग्-देशिकप्रेक्षितोऽहं
सन्त्यक्तोऽन्यैरुपायैरनुचितचरितेष्वद्य शान्ताभिसन्धिः ।
निश्शङ्कस्तत्वदृष्ट्या निरुपचिकदयं प्राप्य संरक्षकं त्वां
न्यस्य त्वत्पादपद्मे वरद ! निजभरं निर्भरो निर्भयोऽस्मि ॥

—एकं वेदान्तदेशिक

विशिष्टाद्वैतविशेषः

प्रायो लोकानुसारान्निखिलनिगमवाक्यानुगुण्यात्परैर-
प्यादर्तव्याखिलार्थादखिलसमविधेरात्ममुक्त्योर्वृतत्वात् ।
भूतेष्वीशाङ्गतोक्तेश्शरणवरणतस्सर्वमोक्षप्रदाना-
न्मुक्तावानन्दसाम्याद् यतिनृपतिमतं सर्वसम्माननार्हम् ॥

—एकं कस्यचित्

निगमनम्

हंसाकारेण सेयं समुचितसरणिस्तत्त्वबोधोज्ज्वलानां
प्राचीनानां यतीन्द्रप्रमुखगुरुविदां मानसी सेव्यमाना ।
पद्यैर्गाङ्गेयपद्मैरिव विबुधगणान् घिन्वती घिन्वती गां
दिव्यामव्यादभव्यादनुगतविभवा कृण्वती कर्णजाहम् ॥

—इति विज्ञापक :श्रीरामशर्मा

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: IKS/Tattva Heritage. Digitization: Sarayu Trust/eGangotri

अनुबन्धः १ — रामानुजचरितम्

आर्द्रायामुदितो महापुरि गतो हस्त्यद्रिमात्ताश्रमः
श्रीरङ्गश्रियमेत्य शिष्यसहितो वेदान्तभाष्यं वदन् ।
दीप्रो दिग्विजयं विधाय सहितो विप्रैर्द्विपञ्चाशता
भाति श्रीयदुभूधरे यतिवरस्सम्पत्कुमारं भजन् ॥

—शासनसङ्ग्रहे कस्यचित्

अनुबन्धः २ — शङ्करसिद्धान्तसारः

अद्वैतं ब्रह्म सत्यं जगदिदमनृतं मायया भासमानं
जीवो ब्रह्मस्वरूपोऽप्यहमिति मम चेत्यस्ति देहेऽभिमानात् ।
श्रुत्या ब्रह्माहमस्मीत्यनुभव उदिते नष्टकर्माभिमानो
मायासंसारमुक्तेरिह भवति सदा सच्चिदानन्दरूपः ॥

—वानवासिकस्य

अनुबन्धः ३ — मध्वसिद्धान्तसारः

श्रीमन्मध्वमते हरिः परतरस्सत्यं जगत्तत्त्वतो
भिन्ना जीवगणा हरेरनुचरा नीचोच्चभावं गताः ।
मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनं
ह्यक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः ॥

—व्यासरायस्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.